# पन्नगेन्द्र शयन

## रागमलिका ताळम्: रूपकम्

## (श्री स्वाति तिरुनाळ् विरचित)

### पल्लवि
### रागं शङ्कराभरणं

पन्नगेन्द्रशयन श्रीपद्मनाभ मुदा काम-
सन्नमानसं मामव सारसायतलोचन ॥

### चरणानि
### रागं काम्भोजि

मन्दमारुतोपि मम मानसं विवशयति
कुन्दकुड्मळरदन कोपमाशु जहि मयि ॥ १ ॥

### रागं नीलाम्बरि

कोकिलशुकादि मञ्जुकूजितमपि मे हन्त
पाकशासनविनुत भाति घोरतममये ॥ २ ॥

### रागं भैरवि

मानिनीजनहसितां मा कुरि मामनन्येशां
सूनसायकसदृशशोभनाङ्ग दयापर ॥ ३ ॥

### रागं तोडि

यामिनीसंवेशेशु त्वाम् काममवलोकयामि
कोमळाङ्ग विगळितघोरतापा क्षणं तदानीम् ॥ ४ ॥

## रागं सुरटि

पाटलबिम्बसदृशपावनविमलाधर
हाटकोपमवसन हारशोभितकन्धर ॥ ५ ॥

## रागं नाथनामक्रिय

देव देव कृपया मे देहि बाहुनिपीडनं
भावयामि भवदीयापाङ्गलीलां रमावर ॥ ६ ॥

## रागं भूपाळं

मोदयामि जगदीश मोहन कामकेळिषु
सादरमर्थये नाथ सामजवरगमन ॥ ७ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠